श्रीयमुनालहरी।

श्रीमातृपञ्चकस्तवसहिता।

श्रीवृन्दावननिवासि श्रीनन्दकिशोरशास्त्रिसुतेन

दुर्गादत्तशर्म्मसामवेदिना विरचिता।

पण्डित श्रीदेवीसहायशर्म्मणा संशोधिता।

डेरागाजीखांपुरनिवासि-श्रीगिरिधारिलालपुत्रेण

बालमुकुन्दवर्म्मणा प्रकाशिता।

कलिकातानगरे

नारायणयन्त्रे

मुद्रिता।

संवत् १९५०

श्रीयमुनालहरी ।

वरीवर्त्तिश्यामा तरणितनया दीनशरणा पदाम्नानामंहो हरणविधिवैदग्ध्यहृदया । प्रवृत्ता गोलोकाद्यदमृतसुधारा-मलहरा पुनन्ती त्रैलोक्यं पुनरपि निजे धाम्नि विशति ॥१॥ यदोकः सिद्धीनां किल जननि ! गोलोकसरणिः प्रवृद्धं सन्तापं प्रशमयितुमारोग्यजनकं । हृदब्जप्रोन्नत्यै मृदुलहिम-सिद्धाञ्जनमिदं त्वदीयं कीलालं मम दुरितजालं जरयतु २॥ तमो दूरीकुर्वन्मदकलहमोहादिकगणं तिरः कुर्वन् कामं समुदितकुगर्वं हृदयतः । सकृद्दृष्टिं यातस्तरणितनयेऽयं तव शुभः प्रवाहो नीराणां मयि विमलतत्त्वं वितरतु ॥ ३ ॥ अयि श्रीकृष्णाङ्गप्रचुरतरगन्धान्तसलिले रजस्तोऽसत्कर्माङ्कित-हृदयसम्मार्जनकरम् । मदीयेऽस्मिंश्चित्ते विविधविषयावास-मलिने चिदानन्दामोदं निगमसृतिबोधं प्रदिशतु ॥ ४ ॥ विचित्रं त्वत्तेजो भुवि किमु समर्थाः प्रकथितुं कवीन्द्रा योगीन्द्रादित्रिगतमुनीन्द्राः शुभधियः । महित्वं तेऽनन्तं त्रप-यति मखादीनपि यतस्त्वया स्पृष्टो वायुर्नरकपदहारी नर-कदः ॥ ५ ॥ पलायन्ते यस्या झटिति शुभनामग्रहणतो भयार्त्ताः पापानां विविधनिकराः कम्पनयुताः । विनि-न्दन्तो मर्त्यान् स्वकृतमलनाशाश्रितविधीनऽतः को वा दक्षस्तवचरणसेवां न हि चरेत् ॥ ६ ॥ जनः को वा दीन-स्त्यजति तव पीताऽम्बरपदैर्विचित्रैः कल्लोलैर्निगमसरित-स्तीरमसितम् । यतः सत्कामानां भवति विमला सिद्धि-

रनिशं निशम्यैतां कीर्त्तिं ह्यहमपि तवोपस्थितिमितः ॥७॥
सदा दीनोद्धारे जयति तव तेजोऽमरनुतं प्रसिद्धं त्रैलोक्ये कविवरगिरा श्लाघितमहो । इदानीं दौर्भाग्यं मम तु तदपि न्यूनयति वै यतस्त्वं निःस्नेहा भवसि मयि दीने पदमिते ॥८॥
अयि श्रीगोविन्दालयकलनि ! मार्त्तण्डतनये ! त्वयाऽहो वैषम्यं वद जननि ! लब्धं कुत इदम् । प्रसूधर्मं यत्त्वं त्यजसि निजबालेषु विषमावरेष्विष्टा मूर्खेष्वितरनयनेति त्वऽघटते ॥ ९ ॥ इदं त्वद्वैषम्यं समुचितपदं नेति कठिनं यदीच्छा चेत्कर्त्तुं भवति तवचित्ते हठयुते । तदा कार्य्यं चैतत्सततमपरेणैव विधिना क्वचित्तत्प्रख्यातं तवसहजजातं रविसुते १०
तदेतद्वैषम्यं प्रथयितुमहं नैव विभवे विशुद्धा लोकन्ते किमु मम लघोः सूचनभरैः । यतस्त्वं पुण्यानामतिशयसमृद्धिं प्रकुरुपेऽन्यथात्वं पापानामिति जननि ! जागर्त्ति जगति ॥ ११
अबोधे विद्रोहं तमसि च विमोहं वितनुषे कलेः सैन्ये शोकं विषयिनि विमोकं रविसुते । मखादीनां ह्रद्धिं जगति च समृद्धिं पदगते तवाहो वैषम्यं कथयितुमिह कः स्याद्विभुरिदम् ॥ १२ ॥ कृतान्तप्रेष्याणां पथिगमनदुःखं प्रहरसि विमानानां तत् त्वं वितरसि कलिन्दाचलभवे । मलाढ्यानां यज्ञोद्भवफलमुताहो विदधती सुरेन्द्राणां चित्ते स्वपदहरणशङ्कां वितनुषे ॥ १३ ॥ इदं त्वद्वैषम्यं क्वनुगतमहो क्वापरमिते स्वभावादुत्पन्नं मयि जननि संयाचनपरे । यतो मत्पापानां प्रबलतरसम्बद्धनिचये कृतोपेक्षासि त्वं चरितमिदमत्यद्भुतपदम् ॥ १४ ॥ स्वसारो वर्त्तन्ते जगति सरलाः स्नेहसहिता निजानां भ्रातॄणां सुखसदनसम्पद्व्रतधियः ।

चरित्रं चैतत्ते त्वमसि विषमा भ्रातरि निजे यतस्तस्या-
वासं गहनमिव शून्यं प्रकुरुषे ॥ १५ ॥ अतस्त्वत्तो भीति-
र्विषमपदतः कर्त्तुमुचिता भवानन्दाकांक्षैस्तदपि तवदास्यं
त्वभिलषे । यतो मे त्वद्भ्राता सह दृढ़विरोधोऽस्त्यघलिपे-
र्निदानादार्य्येऽतस्तवजननि! पक्षेऽस्मि विकलः ॥ १६ ॥ अतो
द्वेषान्भ्रातर्मयि तवपदालम्बनतया न जाने विद्वेषं कति-
विधमुताहो जनयिता । कृतान्तस्त्वद्भ्राता भयमिति मनो
नैव कुरुते यतस्त्वं किन्तस्मान्निजमनुगतं पातुमबला ॥ १७
स्वभावाद्दाऽमर्षाद्यमसदनलुण्ठाकतिलके ममेयं वै मातस्तव-
पदयुगे प्रार्थनपदी । इदानीमारब्धे पितृपतिगृहालुण्ठन-
विधौ मदेनो लेखानां कुरु रचितपत्राऽपहरणम् ॥ १८ ॥
जनं धर्मात्मानं त्वमसि यदि सन्तारयितुमुद्युता संसाराब्धे-
रहह तव कोऽत्रास्ति महिमा । यदा पापात्मानं विगत-
तरणोपायमऽबलं पुनीयास्तर्हीह त्वयि किल महत्वं स्थिति-
मियात् ॥ १९ ॥ शिशूनां बाल्यत्वात्कृतमनुचितं बालचरितं
विलोक्याऽऽमोदन्ते तदपहृतिमाकल्प्य पितरः । अतो मे
यत्किञ्चित्कुचरितमपीक्ष्य तदधुना स्वकीयाद्दासत्वादपहर
तथा पालय शिशुम् ॥ २० ॥ अथ त्वं मत्पापप्रचयमिह
नैवान्तकपदं नयिष्यस्याऽऽर्य्ये चेद्भवति च तदाऽनर्थपदवी ।
गमिष्यन्त्यौनत्यं विभयपदमेनांस्यऽपि नृणां चरिष्यन्तीलायां
स्वरुचि शुभनाशाय यमुने ॥ २१ ॥ अहं वै नो शक्ता तव-
दुरितसन्दारणविधौ वदेश्चेदित्येवं कथमपि न कालिन्दि
घटतेम् । यदेनो मेरोरप्यऽसि बलयुता मर्दनविधौ त्वदग्रे
का वार्त्ता मदघतृणराशेरिति मपे ॥ २२ ॥ यदा पापा-

ऽऽत्मानस्तवजलकणस्पर्शमऽपि वाऽऽप्य ते गोलोके सन्दधति हरिरूपत्वमऽसिताः । अयं कृष्णः किम्वा त्विति बहुपरामर्शमनसो भ्रमन्ति श्रीकृष्णानुगसखिगणा द्वापरंपराः ॥२३॥ समग्रं लोकन्ते तवमहिमवैचित्र्यकुतुकं सुलेखा लेखानां विधिभिरपि लेखा न लिखितुम् । समर्था जायन्ते कथमिह तदा लेखविषये विभुः को वा भूयात्तदवरगुणाविष्टधिषणः ॥ २४ ॥ भवेन्नास्मिंश्चित्रं किमपि गणनाऽतर्क्यविषये महिम्नि त्वत्पादाम्बुजमहस आलेश्वरि ! यतः । भवाब्धिं सन्तीर्णास्तवजलनिषेकादिभिरहो महाघा यावन्तो न हि नभसि तारास्तरणिजे ॥ २५ ॥ भवत्या एतादृक् चरणमहिमा वै समुचितः पुनस्त्व्याः प्राचीनाऽघग्रहहृदयानुत्पथगतान् । यतो ब्रह्माण्डानामधिपतिरनन्तोऽपि विवशस्तवप्रेम्णा मातर्दधत इह केलिं तवतटे ॥ २६ ॥ अथाऽपि श्रीकृष्णालय-विविध-सत्केलिकुतुके कवीन्द्रास्त्वत्पादाम्बुजयुगलसेवाविधिधियः । स्मरन्ति त्वत्कीर्त्तिं विशदयितुमात्मीयरसनं समाप्येवं भावो हृदय उदितो मुग्धमनसः ॥ २७ ॥ त्वदीये प्रत्यक्षे महिमनिहि विश्वाससहितो मलो को वा न स्यात्तवचरणसेवाभिलषकः । यतस्त्वय्यावासात्कठिन उरगः कालिय इतः फणासु क्रीडन्तं निगमपदवीगम्यमजितम् २८ अतस्त्वं गोविन्दं नवहरिणकौशेय वसनं लसन्तं त्वत्तीरे वृषभदयिता-पालनपरम् । विहारैः कौमारैः सखिभिरपि संक्रीड़नपरं विभुं मत्प्राणेशं कुरु झटिति मद्दृष्टिविषये ॥२९ कृता येन क्रीड़ालसति तवतीरे कलशिकाजलादाने काले पशुपरमणीनां सुखकरा । विचित्रैर्माधुर्य्यैः सरसवचनैर्भाव-

सहितैर्वृतं तं स्वीकर्त्तुं कलय किल मां तत्प्रियसखि ॥३०॥
विहारे नित्याख्ये तवपुलिनदेशस्थलमिते सखीरूपेणार्य्यो रसपतिनिकुञ्जोद्भवसुखम्। त्वया प्राप्तं सोऽपि त्वयि वसति साक्षाद्विरतः श्रमः कस्ते मह्यं प्रभुचरणपद्मेक्षणविधौ ॥३१ त्वयि स्नानात्स्नातः पशुपतनयाभिः पतिरितो विभुर्ब्रह्मादीनां व्रजपदयिता जीवनधनम्। पुलिन्दीभिश्चापि प्रभुचरणपङ्केरुहरसो वने प्राप्तः साक्षादिति तवपदस्नानमहिमा ॥ ३२ ॥ विलीयन्ते कर्माण्ययि तवपदा वर्चति जने तदा तस्यार्चायै कलयति विधिं निर्ज्जरगणः। तवभ्रातुर्मन्त्री निजलिपि विनाशं वितनुते तमानेतुं क्षणः परिषदिनियुक्तोऽनुगगणान् ॥ ३३ ॥ भवत्याः श्रीमातर्मधुचरणपङ्केरुहयशोजनः को वा शृण्वंस्त्रिदशपुरवन्द्यो न हि भवेत्। तवातः सुश्लोकं विषमहृदयानामपि गतिप्रदं को वा दक्षो भुवि न शृणुयाद्वा न हि पठेत् ॥ ३४ ॥ भवत्यास्तीरस्था द्रुममृगविहङ्गादय उभयोर्मध्याविष्टाः कमठमकराद्या अपि वराः। यतो जीवन्तस्ते परमपुरुषानन्दजलधौ निमग्नाः सन्त्यन्ते झटिति लयमायान्ति परमे ॥३५॥ कदाप्येको यक्षः क्षिति विबुधधामः स्मरवशः सुरापी मांसाशी श्रुति-स्मृतिविरोधी तवतटे। भ्रमन् दष्टो दैवात्पथिगतभुजङ्गेन सहसा मृतो रेणुस्पर्शाद्विरमित इति त्वत्पदमहः॥३६ मृतेऽरण्ये दुष्टे भसक उरुदुर्गन्धि-क्रमिले त्वदस्, स्नात्वाऽन्यैः क्षतसमर उड्डीयपतितः। वटः कश्चिद्दैवात्तवजलरजःश्लिष्टपतनस्ततः स्पर्शान्मुक्तो भसक इति ते देविमहिमा ॥ ३७ ॥ यदार्येते रोधद्वयलसितपादाशनलताविता-

नराच्छन्नं दिनमणिविभा-तापरहितम् । घनश्यामाङ्गाभञ्जित-मरकताभं शिवकरं मदीय स्नानाय प्रतिदिनमिदं वारि भवतात् ॥ ३८ ॥ मदीयेऽस्मिंश्चिते गगनमणि-कन्ये रुचिरियं वसंस्त्वत्तीरे श्रीपरमपदगोवर्द्धनधरम् । स्मरेयं गोविन्दं सकलमपहायाशु विषयं त्वयेत्यार्ये पाल्या कुरु मयि कृपां दीन उचिताम् ॥ ३९ ॥ ततो वृन्दारण्ये नव-पुलिन-सद्वृक्षकलिते निकुञ्जे क्रीड़न्तं स्वपदरमणीभिः परि-वृतं । हरिं राधायुक्तं कनकमणिसिंहासनयुतं निरीक्षन्नर्चिष्ये तवचरणजाऽनुग्रहलवात् ॥ ४० ॥ कदाहं त्वां मातस्तव-चरणपङ्केरुहकृपाभरादार्य्ये नित्यं निगमशुभसारैकशरणः । परानन्दाऽऽपुष्टः परिहृतभवानन्दनिकरः प्रसीद श्रीकृष्णे कुरु मयि दयां कृष्णदयिते ॥ ४१ ॥ इदानीं सन्देहो भवति मयि कालिन्दिरविजे स्वभावादुत्पन्नं विविधजनतोद्धारकगुणं । अथाद्याहो मातर्गतमहह किं विस्मृतिपदं यदंघ्र्याब्जामोदं वितरसि न मे दीनगतिदे ॥ ४२ ॥ त्वदंघ्र्याब्जालम्बाद्विगत-सुरभीतीरवसुते ह्यहं चिन्ताहीनो निजभवसमुद्धारविषये । इदानीं मत्यागो यदि व्रतविधेयो जननि ते तदा मे स्या-द्धानिस्तव तु यशसामन्तविषयः ॥ ४३ ॥ पुनन्ती त्वं लोकां-स्त्यजसि निजलोकानिति शुभे चरित्रं को ब्रूयात् क्षम मयि सहस्रांशुतनये । कथं मे त्वं पुत्री भवसि वद चेच्छृणुष इति स्वयं प्राप्तोऽपि स्यात्सुत इति दृढ़ाऽस्ति श्रुतिरिह ॥४४॥ सुता नो जायन्ते जगति मलमूत्रादिरहितास्तथा नो मातापि श्रुतिपथमिता ग्लानिसहिता । सदाचारश्चैकं जयति नु तिरस्कृत्य तमहो कथं मत्तो ग्लानिं कुरुष इह

मातर्मलिनतः ॥ ४५ ॥ अयि श्रीगोविन्दप्रियसखिसहस्रांशु-
तनये तमोनाशो न स्याद्यदि तवपितुः कः करगुणः । तथा
त्वत्पादाब्जाऽऽश्रयिण इह मेऽन्तःकरणतस्तमोलोपो न स्यात्
किमु तवयशस्तर्हि भविता ॥ ४६ ॥ तवालम्बान्मातर्मद-
कलहमोहादिकखलान् कदर्थीकृत्येमं भवनिधिमहं तर्त्तु-
मबलः । समोहे हे कृष्णे मम पणमिमं पालय शिशोर्नि-
रोचन् कीर्त्तिं स्वामपि जननि मा ह्रासय रिपून् ॥ ४७ ॥
नमस्ते कालिन्दि प्रभुचरणपङ्केरुहरजस्तुलस्यामोदाभोवि-
विधगमनाऽऽनन्दरसदे । तरङ्गैः प्रोत्तुङ्गैः कलिकलुषभङ्गैः
शिवतमैर्मदङ्गम्मार्जन्ती मम मन इने प्रेरय निजे ॥ ४८ ॥
क्वचिन्नोभिर्वत्सैः क्वचिदपि मयूरादिनिकरैः क्वचिद्दासन्नातीनां
पशुपरमणीनां नवगणैः । क्वचिद्वेदाभ्यासाऽऽगमजपपरै-
र्ब्राह्मणगणैर्व्रजं याते शोभा मम हृदयलोभाय भवतात् ४९
कृपालुत्वं ते वा इह जगति को वा निगदितुं समर्थः
सम्भूयात्कविसदसि साहित्यचतुरः । सुनीतेर्बालो यत्तवतट-
निवासेन झटिति प्रपेदे श्रीकृष्णं त्विति खलु न को वेत्ति
यमुने ॥ ५० ॥ पयोदाभे मातस्तवशुभपयःपानविधिना-
ऽम्बरीषो दुर्वासः कृतकठिनपाशादपि दृढः । भयं नैव
प्रापैषदपि हरिचक्राऽवितनुर्हतः को वा न स्यात्तवसलि-
लपानाऽर्पितमनाः ॥ ५१ ॥ कृतान्तस्त्वद्भ्राता तवपदकृता-
लम्बनजनान् समर्चन्नानन्दं भजति च पयःपाननिरतान् ।
कथं वा नो कुर्य्याद्यदुचितमिदं धर्मपथगः स्वसुःपुत्रान्
यस्माद्यजतिविभवैर्मातुलगणः ॥ ५२ ॥ उषो मज्जन्तीनां
व्रजपदयितानां तनुगतैः सुरागैरामोदैः शिवशिवकरैः

पिञ्जररुचि । त्वदीयं कीलालं त्रिदशनिकरैः प्रार्थ्यमनिशं कथं न स्यान्मातर्बुधजनमनोहारि यमुने ॥ ५३ ॥ मधोः पुर्याः प्राच्यां दिशि लसति भूयोजनमिते विचित्रे रायाख्ये नगर उरुकालात् स्वपितृभिः । कृतं वासं त्यक्त्वा तवजलनिपानैकविधिना स्वमुक्तेः संसिद्ध्यायऽहमुपगतिवृन्दावन इतः ५४ खलो वा नीचो वा निगमविमुखो वा शठमतिर्मदी वा क्रोधी वा कलिमलरतो वा विषयधीः । अहं यादृक् तादृक् तवचरणपङ्केरुहरजःप्रपन्नोऽहं मातस्त्विह यदुचितं तत्कुरु हितम् ॥ ५५ ॥ नमस्ते कृष्णायै दिनमणिसुतायै भवकृते नमः श्रीकालिन्द्यै जनशरणदात्रै शुभभुवे । नमः संस्तुतायै यदुपतिगृहिण्यै किल नमो नमस्ते श्रीवृन्दावनपुलिनकेल्यायऽयि नमः ॥ ५६ ॥ स्वान्तःसुखाय यमुनालहरीकृतेयं श्लोकैर्लसच्छिखरिणीत्यभिधानवृत्तैः । प्रेम्णाऽर्पिता रविसुतापदयोश्च दुर्गादत्ताऽभिधेन कविनन्दकिशोरजेन ॥५७॥

इति श्रीनन्दकिशोरात्मज-दुर्गादत्तकृता

श्रीयमुनालहरी समाप्ता ।

श्रीमातृपञ्चकम् ।

श्रीमातृदेवताचरणेभ्यो नमः । अहो मातर्नित्यं तव तु महिमा वेदकथितः पुराणादौ सिद्धः खलु जगति जागर्त्ति परमे । अतो वै मच्चित्ते दृढ़मिति परं जातमनिशं कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ १ ॥ अहं दीनः पुत्रस्तवचरणसेवाविरहितः परं त्वद्द्रव्याणामपहरणकर्त्ता शठमतिः । तथाऽप्याऽऽर्य्ये पात्यस्त्विति जननि संवीक्ष्यपदवीं कुपुत्रो जायेत क्वचिदपि कुमाता न भवति २ इदानीं पर्य्यन्तं स्वजननमथारभ्य कुधिया समाश्लिष्टेनाहो जननि नु न बुद्धं तवमहः । तथाऽप्यम्बप्रेम्णा मम हितविधिं चेच्छसि यतः कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ३ मया गर्भाऽऽवासात् क्वचिदपि सकृन्नैव सुखिता परं त्वं क्लेशानामयि जननिपात्रं वतकृता । तथाप्येषा चित्ते मम वसति विश्वासपदवी कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥ कदाचित्सेवा ते जननि खलचित्तेन हि मया कृता नो सद्वाक्यैरपि किमुत शास्त्रीय विधिना । तथाप्यार्य्ये मातः क्वचिदपि न रुष्टा मयि यतः कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ५ ॥ श्रीमातृपञ्चकमिदं रचितं सुपद्यैर्दुर्गाऽभिधेन कवि-नन्दकिशोरजेन । यो मातृपूजनमनुप्रपठेत्सुपुत्रस्तस्याशु तुष्यति हरिः सकलार्त्तिहर्त्ता ॥ ६ ॥ इति श्रीदुर्गादत्तकृतं श्रीमातृपञ्चकं समाप्तम् ॥

पुस्तक मिलने का ठिकाना ।

पण्डित श्रीदुर्गादत्तशर्मा
अठखम्बा वृन्दावन
जिला मथुरा ।

बालमुकुन्द कम्पनी
नई पचैयापट्टी नम्बर ५१
कलकत्ता ।

प्रकाशक—बालमुकुन्द वर्म्मा ।
नई पचैयापट्टी ५१ नं० कलकत्ता ।

प्रिण्टर—श्रीरामनारायणपाल ।
७५ नं० काटनष्ट्रीट कलकत्ता ।